# Appendix 02

## अनन्त श्रीविभूषित जगदगुरु निम्बार्काचार्यपीठाधीश्वर जगद्विजयी

## श्रीकेशवकाश्मीरिभट्टाचार्य विरचितम्

## ।। श्रीयमुनास्तोत्रम् ।।

आचार्यवर्योऽपि सुरेन्द्रसेव्यं सूर्य्यात्मजायास्तटमाविवेश ।।

तीर्थानि चावाह्य निमज्जमानो दध्यौ सुपर्णध्वजपट्टकान्ताम् ।।१।।

भानुसुता प्रेमलता कुञ्जगता कृष्णारता

तद्वशगास्सखीगणा वस्त्रधरा रुपभराः ।।२।।

श्यामामम्भोजनेत्रां सघनघनरुचिं रत्नमञ्जीरकूजत्

कांचीकेयूरयुक्तां कनकमणिमये बिभ्रतीं कुण्डले द्वे ।।

भ्राजच्छ्रीनीलवस्त्रां स्फुरदमललसद्धालभाराम्मनोज्ञां

ध्यायेन्मार्त्तण्डपुत्रीं तनुकिरणचयोद्दीप्तदीपाभिरामाम् ।।३।।

फुल्लेन्दीवरचारुदीर्धनयनां नीलप्रभाद्योतिताम्

दिव्यां दिव्यवपुर्धरां सुवसनां दिव्यां गतिं बिभ्रतीम् ।।

भ्राजन्नूपुरपादपद्मयुगलामानन्दकल्लोलिनीं

कालिन्दीं कलगामिनीं कलरवां श्रीकृष्णकान्तां भजे ।।४।।

नानारत्नमणिप्रभेदनिकरैर्माणिक्यमुक्ताफलैः ।

आमुक्तोन्नतकन्धरां हरियुतां नीलालकालंकृताम् ।।

वृन्दारण्यनिकुञ्जवासमुदितां राजीवमालान्वितां ।

ध्यायन्तीं हरिपादयुग्ममनिशं श्रीकृष्णकान्तां भजे ।।५।।

प्रातः श्रीयमुने त्वदीय चरणौ संसारतापापहौ

हार्द्ध्वान्तविनाशनौ सुखकरौ देवैः सदा वन्दितौ ॥

ध्यानावस्थितमानसे मुनिवरैः संस्थापितौ सर्वदा

वन्दे तौ पुरुषार्थतुर्यजनकौ रासोत्सवालंकृतौ ॥६॥

त्वन्नीरं निरयापहं नरवरैराराधनीयं सुरैः

स्वर्लोके नितरां निवासनिरतैस्त्वल्लोकवासाय वै ॥

यद्वा ये मृगभूरुहाः खगनगा हंसादयः सारसा-

स्तेषांचापि विमुक्तिदं किमु त्वयि प्रीत्या सदा सेवितम् ॥७॥

ये नित्यं तवतीरसेवनपरास्त्वन्नीरपाने रताः

यैः स्नानं सुकृतेन वै प्रतिदिनं त्वन्नामसंधारितम् ॥

तेषां वै यमलोकलोकनमपि भ्रात्रा तवोद्धारितं

किन्त्वेते किल मुक्तिसाधनपराः श्रीकृष्णसाम्यं गताः ॥८॥

त्वत्तीरस्थकदम्बकाननलताच्छायाकुटीवासिभिः

सिद्धिः सार्धमहर्निशं हरिकथाः श्रृण्वन्ब्रुवन्वै मुदा।

कांक्षेहं तव तीरसेवनपरस्तवन्नीरपाने रतिं

त्वद्वीचीक्षणसूत्सवं त्वयि मनः स्यान्मे शरीरक्षयः ॥९॥

त्वत्तीरे कमलापतिं तव पतिं सूर्यात्मजे माधवि

श्रीराधासहितं तिरस्कृतरविं मेघाभमानन्ददम् ॥

भिन्नाभिन्नमजं हरिंचिदचितःसर्वेश्वरं मालिनं।

नानारत्नविभूषितं नटवरं पीतांबरं सुन्दरम् ॥१०॥

सत्यं ज्ञानमनन्तमादिपुरुषं यज्ञेश्वरं केशवं

दोषैः पञ्चभिरस्पृशं प्रकृतिजैर्षड्भिर्विकारैर्गुणैः ॥

श्रीकृष्णं व्रजयसुन्दरीजनमुखामोदैकपानोन्मदं

भक्ताभीष्टप्रदं स्वभावसुभगं व्यूहांगिनं मुक्तिदम् ॥११॥

सार्वज्ञादिगुणाकरं भवजनिध्वंसैकबीजं परं

माया कालनियामकं नरकृतिं गोवर्धनोद्धारिणम् ॥

वृन्दारण्यकदम्बकाननकलत्केकिक्कणानन्दकं

गोवत्सादिसमस्तबालकयुतं गोपीसुखैकास्पदम् ॥१२॥

कञ्जाक्षं करकङ्कणं स्मितमुखं वंशीकरं बालकं

गोपानां वनिताशतैः परिवृतं रासोत्सवोल्लासिनम्

लीलानर्तनकौतुकं हरिहरब्रह्मादिदेवार्चितं

श्रीमन्मन्मथमन्मथं बत कदा द्रक्ष्याम्यहं चक्षुषा ॥१३॥

नानाकामकुवासनालसमदैः कर्माख्ययाविद्यया

नानायोनिषु जायमानमनिशं तापत्रयोन्मर्दितम्

संसाराब्धितरङ्गताडितधियं मामागतं त्वत्तटे

श्रीकृष्णे वरदे च विश्वजननि मां पाहि सर्वेश्वरि ॥१४॥

बालं सालसविग्रहं प्रपतितं वह्नौ जले कण्टके

दुष्टाघातभयानकानिलभयान्माता न किं रक्षति ॥

वात्सल्यादिगुणालये भगवति स्वं पुत्रकं हीश्वरि

जात्वेनं कलिना विदूषितमतिं रक्षस्व मां मानदे ॥१५॥

यः पठेत् प्रातरुत्थाय यमुनायाः स्तवं शुभम् ।

यमुनायाः प्रियो भूत्वा श्रीकृष्णे सुरतिं लभेत् ॥१६॥

स्तवैः स्तुत्वा नमस्कृत्य स्नात्वा वै यमुना जले ।

नित्कर्मविधायाथ यन्त्रराजञ्च निर्ममे ॥१७॥

दर्शनात्तस्य यन्त्रस्य म्लेच्छामूर्छां प्रपेदिरे ।

पौरुषं च परित्यज्य ते स्त्रीभावमुपागताः ॥१८॥

ततस्ते यवनाधीशाः सर्वतोनिष्फलक्रियाः।

भावमासुरकं हित्वा ह्याचार्यशरणं ययुः ॥१९॥

आचार्यो व्यसनं तेषां वीक्ष्याथ करुणानिधिः ।

यमुनाया जलस्पर्शात् सर्वेषां शं चकार ह॥२०॥

ते स्वजात्युद्भवान् दोषान् परित्यज्य सुदुस्त्यजान्।

हरिभक्तिरता आसन्नाचार्यस्य प्रभावतः ॥२१॥

॥ अनन्त श्रीविभूषित जगद्गुरु निम्बार्काचार्यपीठाधीश्वर जगद्विजयी

श्रीकेशवकाश्मीरिभट्टाचार्य विरचितं श्रीयमुनास्तोत्रं सम्पूर्णम् ॥

✠✠✠✠✠